गुरोर्वर्षः १ दिनम् २० फलम् ।
धर्म्मार्थकामसौख्यानि ददाति विबुधार्च्चितः ।
कृपारिजनपीड़ाञ्च भानोः पाकदशां गतः ॥ ६ ॥
राहोर्मासाः ८ फलम् ।
अशुभाशुभवं द्वेषं चारभीतिसुतक्षयान् ।
कुरुते सिंहिकासुनू रविपाकदशां गतः ॥ ७ ॥
शुक्रस्य वर्षः १ मासौ २ फलम् ।
कौष्ठ्यैवाशिरोरोगज्वरान् शूलादिदारुणान् ।
शोकं करोति भृगुजः सूर्यस्यान्तर्दशां गतः ॥ ८ ॥
एवं वर्षाः ६ ॥ * ॥ चन्द्रस्य स्थूलदशावर्षाः १५
तस्यैवान्तर्दशावर्षौ २ मासः १ फलम् ।

कर्णादिरत्ननिकरवाहवस्त्रपत्न-
क्षेत्रमलयजलवीर्य्यसमन्वितानि ।
मिष्टान्नपानशयनासनभोजनानि
चान्द्री दशा प्रचुरकाञ्चनभूमिदात्री ॥

कुजस्य वर्षः १ मासः १ दिनानि १० फलम् ।
पित्तशोणितपीड़ाञ्च चौरादीनां भयन्तथा ।
मङ्गलः कुरुते नित्यं विधोरन्तर्दशां गतः ॥
बुधस्य वर्षौ २ मासाः ४ दिनानि १० फलम् ।
सर्व्वत्र द्रव्यलाभञ्च गजाश्वगोधनानि च ।
चन्द्रजः कुरुते सौख्यं विधोरन्तर्दशाङ्गतः ॥
शनेर्वर्षः १ मासाः ४ दिनानि २० फलम् ।
बन्धुक्लेशं नृपाद्भीतिं व्यसनं शोकसम्पदम् ।
विनाशं कुरुते सौरिश्चन्द्रस्यान्तर्दशाङ्गतः ॥
गुरोर्वर्षौ २ मासाः ७ दिनानि २० फलम् ।
दानसौख्यानि सम्भोगं वस्त्रालङ्कारभूषणम् ।
कुरुते विबुधाचार्य्यो विधोरन्तर्दशाङ्गतः ।
राहोर्व्वर्षः १ मासाः ८ फलम् ॥
वह्निशत्रुभयं दुःखं शोकं बन्धुजनक्षयम् ।
कुरुते राहुरत्यर्थं चन्द्रपाकदशाङ्गतः ॥
शुक्रस्य वर्षौ २ मासाः ११ फलम् ।
सेव्यते वरनारीभिर्नरो लक्ष्मीश्च वर्द्धते ।
मुक्ताहारमणिप्राप्तिर्विधोरन्तर्गते सिते ॥
रवेर्मासाः १० फलम् ।
ऐश्वर्य्यं बहुसौख्यञ्च व्याधिनाशमरिक्षयम् ।
नृपतेजो रविः कुर्य्याद्विधोः पाकदशाङ्गतः ॥
एवं वर्षाः १५ ॥ * ॥ कुजस्य स्थूलदशावर्षाः ८ ।
तस्यान्तर्दशामासाः ७ दिनानि ३।२०। फलम् ।

क्रूराभिघातवधबन्धभयानि घत्ते
चिन्तातुरं विकलमूत्रव्यथाश्रमञ्च ।
चौराग्निभीतिधननाशनरेन्द्रपीड़ाः
कुर्य्याद्विनाशनिधनञ्च दशा कुजस्य ॥

बुधस्य वर्षः १ । ३ । ३ । २० । फलम् ।
परमैश्वर्य्यमतुलं नानाविधसुखाश्रयम् ।
करोति सोमपुत्त्रश्च क्षितिजान्तर्दशाङ्गतः ॥
शनेर्मासाः ८ । २६ । ४० । फलम् ।
रिपुचौराग्निभीतिञ्च रोगमन्तरसम्भवम् ।
महाजनकृतो द्वेषः कुजस्यान्तर्गते शनौ ॥
गुरोर्वर्षः १ । ४ । २६ । ४० । फलम् ।
पुष्पधूपान्नवस्त्राद्यैर्देवब्राह्मणपूजनम् ।
नृपतुल्यत्वमाप्नोति कुजस्यान्तर्गते गुरौ ॥
राहोर्मासाः १० । २० । फलम् ।
आत्मकार्य्यार्थसुद्वेगं बन्धचौरादिसाध्वसम् ।
कुरुते सिंहिकापुत्त्रो भौमस्यान्तर्दशाङ्गतः ॥
शुक्रस्य वर्षः १ । ६ । २० । फलम् ।
धनवृद्धिं सुखारोग्यं नानावस्त्रं वरस्त्रियः ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते भृगौ ॥
रवेर्मासाः ५ । १० । फलम् ।
नानाद्रव्यञ्च सौख्यञ्च भूमिलाभमथापि वा ।
नृपपूजामवाप्नोति कुजस्यान्तर्गते रवौ ॥
सोमस्य वर्षः १ । १ । १० । फलम् ।
धनलाभं सुखं भोगं शरीरारोग्यमेव च ।
लोकानन्दमवाप्नोति क्षितिजान्तर्गते विधौ ॥
एवं वर्षाः ८ ॥ * ॥ बुधस्य स्थूलदशावर्षाः १७ ।
तस्यान्तर्दशा २ । ८ । ३ । २० । फलम् ।

दिव्याङ्गनावदनपङ्कजषट्पदत्वं
लीलाविलासवरभोगसुखोदयञ्च ।
नानाप्रकारविभवागमकोषवृद्धिं
चिप्रं सृजेद्बुधदशा प्रबलाञ्च सिद्धिम् ॥

शनेर्वर्षः १ । ५ । २६ । ४० । फलम् ।
वातश्लेष्मकृता पीड़ा विरहो बन्धुभिः सह ।
विदेशगमनञ्चैव बुधस्यान्तर्गते शनौ ॥
गुरोर्वर्षौ २ । ११ । २६ । ४० । फलम् ।
व्याधिशत्रुभयत्यक्तो धनाढ्यो नृपवल्लभः ।
लभेद्भार्य्यां सुपुत्त्रञ्च बुधस्यान्तर्गते गुरौ ॥
राहोर्वर्षः १ । १० । २० । फलम् ।
बन्धुनाशं मनस्तापं देशत्यागञ्च बन्धनम् ।
करोति बहुदुःखानि बुधस्यान्तर्गतस्तमः ।
शुक्रस्य वर्षाः ३ । ३ । २० । फलम् ।
धनाढ्यं बन्धुपुत्त्रञ्च धर्म्मवत्त्वं धनागमम् ।
कुरुते दानवाचार्य्यो बुधपाकदशाङ्गतः ॥
रवेर्मासाः ११ दिनानि १० । फलम् ।
श्रिया परमया युक्तो गजवाजिधनान्वितः ।
प्रभाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
सोमस्य वर्षौ २ । ४ । १० । फलम् ।
कण्टकादिप्रवेशञ्च शृङ्गिभ्यो भयमेव च ।
निशाकरः करोत्याशु बुधपाकदशाङ्गतः ॥
कुजस्य वर्षः १ । ३ । ३ । २० । फलम् ।
कफपित्तसमुद्भूतां शिरःपीड़ां भयावहाम् ।
माहेयः कुरुते शोकं बुधस्यान्तर्दशाङ्गतः ॥
एवं वर्षाः १७ ॥ * ॥ शनेः स्थूलदशावर्षाः १० ।
तस्यान्तर्दशामासाः ११ । ३ । २० । फलम् ।

मिथ्यापवादवधबन्धनिराश्रयत्वं
चौरादिभूपतिभुजङ्गमभीतिसङ्घम् ।
आशानिराशमथ चाप्यनकार्य्यहानिं
पङ्गोर्दशा प्रकुरुते नियतं नराणाम् ॥

गुरोर्वर्षः १ । ६ । ३ । २० । फलम् ।
देवतागुरुतं शान्तं नानाप्राप्तिं करोति च ।
तुङ्गसौख्यसमायुक्तं पङ्गोरन्तर्गतो गुरुः ॥
राहोर्व्वर्षः १ । १ । १० । फलम् ।
नृपाद्भयं ज्वरं घोरं दुःखञ्च प्राणसंशयम् ।
धनक्षयञ्च कुरुते शनेरन्तर्गतस्तमः ॥
शुक्रस्य वर्षः १ । ११ । १० । फलम् ।
सुहृद्बन्धुधनैः पूर्णो भार्य्यावित्तसमन्वितः ।
स्वर्णं सुखञ्च लभते सौरस्यान्तर्गते सिते ॥
रवेर्मासाः ६ । २० । फलम् ।
परदाराभिगमनं करोति खरदीधितिः ।
जीवनस्य च सन्देहं शनेरन्तर्दशाङ्गतः ॥
सोमस्य वर्षः १ । ४ । २० । फलम् ।
स्त्रीनाशं कुक्षिरोगञ्च कफपित्तगदं शशी ।
बन्धुद्वेषञ्च कुरुते पङ्गोरन्तर्दशाङ्गतः ॥
कुजस्य मासाः ८ । २६ । ४० । फलम्
देहवैकल्यं महारोगं नानादुःखानि भूमिजः ।
धननाशञ्च कुरुते शनेरन्तर्दशाङ्गतः ॥
बुधस्य वर्षः १ । ६ । २६ । ४० । फलम् ।
आरोग्यं विजयं राज्यं बहुवित्तानि सोमजः ।
करोति त्वादरं लोके शनेरन्तर्दशाङ्गतः ॥
एवं वर्षाः १० ॥ * ॥ गुरोः स्थूलदशावर्षाः १९ ।
तस्यैवान्तर्दशावर्षाः ३ । ४ । ३ । २० । फलम् ।

राज्यास्पदं तनयवित्तविलासभोगान्
पर्य्याप्तसौख्यधनधान्यसमाश्रयञ्च ।
विद्याप्रसादवररत्नसुखार्थभोग-
सिद्धिं दशा सुरगुरोः कुरुते प्रियत्वम् ॥

राहोर्वर्षौ २ । १ । १० । फलम् ।
बन्धुद्वेषं व्यवायादं स्थानभ्रंशं निराश्रयम् ।
कलहं कारयेद्राहुर्गुरोरन्तर्दशाङ्गतः ॥
शुक्रस्य वर्षाः ३ । ८ । १० । फलम् ।
कलहं बन्धुभिः सार्द्धं वित्तनाशं मनःक्षतिम् ।
स्त्रीवियोगञ्च कुरुते जीवस्यान्तर्गतः सितः ॥
रवेर्वर्षः १ । दिनानि २० । फलम् ।
बहुमित्त्रं बहुधनं सौभाग्यं राजवल्लभम् ।
कुरुते भास्करः शान्तिं गुरोरन्तर्दशाङ्गतः ॥
सोमस्य वर्षौ २ । ७ । २० । फलम् ।
भोगाढ्यो बहुभार्य्यः स्याद्रिपुरोगविवर्ज्जितः ।
नृपतुल्यो भवेच्चैव गुरोरन्तर्दशाङ्गतः ॥
कुजस्य वर्षः १ । ४ । २६ । ४० । फलम् ।
तीक्ष्णरोषो रिपोर्हन्ता गजवह्निमदर्शनः ।
सुखसौभाग्यसंयुक्तः कुजे चान्तर्गते गुरोः ॥
बुधस्य वर्षौ २ । ११ । २६ । ४० । फलम् ।
सुस्थोऽसुस्थः सुखी दुःखी शत्रुदृग्भिः पुनः पुनः ।
देवार्च्चनपरो नित्यं जीवस्यान्तर्गते बुधे ॥
शनेर्वर्षः १ । ९ । ३ । २० । फलम् ।
वेश्याङ्गनाश्रयात सौख्यं भवेद्वित्तविवर्ज्जितः ।
सुप्रीतिमना नित्यं गुरोरन्तर्गते शनौ ॥
एवं वर्षाः १९ ॥ * ॥ राहोः स्थूलदशावर्षाः
१२ । तस्यान्तर्दशावर्षः १ । ४ । फलम् ।

भार्य्यादिदूषण-निदानविवादबन्ध-
शस्त्राभिघातभयहीनपराक्रमञ्च ।
अप्राप्तसौख्यधनकाञ्चनदीनदेहो
राहोर्दशा भवति जीवनसंशयाय ॥

शुक्रस्य वर्षौ २ । मासाः ४ । फलम् ।
शिरोरोगं कुदेहञ्च कुर्य्याद्भार्य्याञ्च चञ्चलाम् ।
बान्धवैः कलहो नित्यं राहोरन्तर्गते भृगौ ॥
रवेर्मासाः ८ । फलम् ।
शिरोरोगभयं घोरं ज्वलं शोकञ्च दारुणम् ।
दद्रुदग्निभयं कुर्य्याद्राहोरन्तर्गतो रविः ॥